# BACHELOR OF ARTS EXAMINATION, 2017

(1st Year, 1st Semester)

**SANSKRIT (Honours)**

**Course : I**

[ **Mahākāvya and Metrics**]

Time : Two Hours | Full Marks : 30

*The figures in the margin indicate full marks.*

१. '... स ताभ्यो बलिमग्रहीत्।'

अत्र 'स' इतिपदेन कस्य निर्देशः? स काभ्यः किमर्थं च बलिमग्रहीत्? किं नाम बलिः? प्रसङ्गनिर्देशपुरःसरम् उक्तेरस्याः तात्पर्यं विचार्यताम्? ½+1½+1+3=6

**अथवा,**

'तस्य संवृतमन्त्रस्य गूढ़ाकारेङ्गितस्य च।'

कस्मिन् प्रसङ्गे एतदुक्तम्? 'तस्ये'तिपदेन कस्य निर्देशः? 'आकारेङ्गितयोरर्थौ देयौ। मन्त्र इत्यनेन किं सूचितम्? राज्ञः कृते संवृतमन्त्रस्योपयोगः निरूप्यताम्। 1+½+2+1+1½=6

२. सुरगिरा देवनागरीं लिपिमाश्रित्य **चत्वारः** प्रश्नाः समाधेयाः — 1×4=4

(क) रघुवंशीयाः राजानः किमर्थमर्थसंचयं कुर्वन्ति स्म?

(ख) दिलीपस्य शुद्धत्वं केन सह उपमीयते?

[*Turn over*]

(ग) दिलीपस्यार्थसाधनयोरेकस्योल्लेखः क्रियताम्।

(घ) किमर्थं राजा दिलीपः प्रजानां पिता इत्युच्यते ?

(ङ) राज्ञा दिलीपेन दुष्टजनः केन प्रकारेण त्यक्तः ?

(च) दिलीपस्य पत्न्याः नाम किम् ? किमर्थमेतन्नामकरणम् ?

३. विभक्तिसहयोगेन सुरगिरा शब्दार्था देयाः (**चतुष्टयस्य**) — ½×4=2

उर्वीम्, अन्वयः, मघवा, सप्रसवाः, प्रांशुः, नियन्तुः

४. 'किरातार्जुनीयम्' इति महाकाव्यस्य प्रथमे सर्गे दुर्योधनस्य प्रजापालनविषये युधिष्ठिरं प्रति वनेचरवचनं स्पष्टीकरणीयम्। 6

**अथवा,**

'किरातार्जुनीयम्' इति महाकाव्यस्य प्रथमे सर्गे चरस्य कार्यविषये कविना यदुक्तं तन्निरूप्यताम्।

५. संस्कृतभाषया देवनागर्या लिप्या च समाधीयताम्।

'न बाधतेऽस्य त्रिगणः परस्परम्'–वाक्येऽस्मिन् 'त्रिगण'शब्देन के उच्यन्ते ? अत्र 'अस्य, पदेन कः सूचितः ? कथं त्रिगणः परस्परं न बाधते ? 1+1+2=4

**अथवा,**

'निहन्ति दण्डेन स धर्मविप्लवम्'–वाक्यमिदं केन उक्तं कमुद्दिश्य च ? 'स'–पदेन अत्र को निर्दिष्टः ? केन प्रकारेण च स धर्मविप्लवं निहन्ति ? 1+1+2=4

[*Turn over*]

६. अध:स्थितेषु **द्वयोः** पर्यायशब्दो देयः। (सुरगिरा) 2

जिह्मः, मन्युना, भृशम्, संयति।

७. निम्नोक्तेषु छन्दःसु **एकस्य** सोदाहरणं लक्षणं देयम्। 3

वंशस्थविलम्, शालिनी, रुचिरा।

८. श्लोकस्यास्य गणनिर्देशपूर्वकं छन्दोनिर्णयः कर्तव्यः। 3

भानुः सकृद्युक्ततुरङ्ग एव
रात्रिन्दिवं गन्धवहः प्रयाति।
शेषः सदैवाहितभूमिभारः
षष्ठांशवृत्तेरपि धर्म एषः।।